○クラスの始まりの祈り

・ガネーシャへの祈り

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायीत् सर्वविघ्नोपशान्तये ॥

śuklāmbaradharaṃ viṣṇuṃ śaśivarṇaṃ caturbhujam |
prasannavadanaṃ dhyāyīt sarvavighnopaśāntaye ||

・サラッスヴァティへの祈り

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ॥

sarasvati namastubhyaṃ varade kāmarūpiṇi |
vidyārambhaṃ kariṣyāmi siddhirbhavatu me sadā ||

・クラスの始まりの祈り

स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु । स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्वि ना॒वधी॑तमस्तु॒ । मा वि॑द्विषा॒वहै॑ ॥
ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

saha nāvavatu | saha nau bhunaktu | saha vīryaṃ karavāvahai |
tejasvi nāvadhītamastu | mā vidviṣāvahai ||
oṃ śāntiḥ śāntiḥ śāntiḥ ||

・先生への祈り

नमो ब्रह्मादिभ्यो ब्रह्मविद्यासम्प्रदायकर्तृभ्यो
वंशर्षिभ्यो महद्भ्यो नमो गुरुभ्यः ।

namo brahmādibhyo brahmavidyāsampradāyakartṛbhyo
vaṃśarṣibhyo mahadbhyo namo gurubhyaḥ |

सर्वोपप्लवरहितः प्रज्ञानघनः प्रत्यगर्थो ब्रह्मैवाहमस्मि ॥ब्रह्मैवाहमस्मि ॥

sarvopaplavarahitaḥ prajñānaghanaḥ pratyagartho brahmaivāhamasmi ||brahmaivāhamasmi ||

・聖典への祈り

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥
śrutismṛtipurāṇānām ālayaṃ karuṇālayam |
namāmi bhagavatpādaṃ śaṅkaraṃ lokaśaṅkaram ||

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
śaṅkaraṃ śaṅkarācāryaṃ keśavaṃ bādarāyaṇam |
sūtrabhāṣyakṛtau vande bhagavantau punaḥ punaḥ ||

ईस्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः ॥
īsvaro gururātmeti mūrtibhedavibhāgine |
vyomavad vyāptadehāya dakṣiṇāmūrtaye namaḥ ||

・先生への祈り

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
ajñānatimirāndhasya jñānāñjanaśalākayā |
cakṣurunmīlitaṃ yena tasmai śrīgurave namaḥ ||

○ランチの前のチャンティング

・भगवद्गीता Chapter 15

श्रीभगवानुवाच ।
ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥१॥
śrībhagavānuvāca |
ūrdhvamūlamadhaḥśākhamaśvatthaṃ prāhuravyayam |
chandāṃsi yasya parṇāni yastaṃ veda sa vedavit ||1||

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।
अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥२॥
adhaścordhvaṃ prasṛtāstasya śākhā guṇapravṛddhā viṣayapravālāḥ |
adhaśca mūlānyanusantatāni karmānubandhīni manuṣyaloke ||2||

न रूपनस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।
अश्वत्थमेनं सुविरूढमूलम् असङ्गशस्त्रेण दृढेन छित्त्वा ॥३॥
na rūpanasyeha tathopalabhyate nānto na cādirna ca sampratiṣṭhā |
aśvatthamenaṃ suvirūḍhamūlam asaṅgaśastreṇa dṛḍhena chittvā ||3||

ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥४॥
tataḥ padaṃ tatparimārgitavyaṃ yasmingatā na nivartanti bhūyaḥ |
tameva cādyaṃ puruṣaṃ prapadye yataḥ pravṛttiḥ prasṛtā purāṇī ||4||

निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥५॥
nirmānamohā jitasaṅgadoṣā adhyātmanityā vinivṛttakāmāḥ |
dvandvairvimuktāḥ sukhaduḥkhasaṃjñairgacchantyamūḍhāḥ padamavyayaṃ tat ||5||

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्वत्वा न निवर्तन्ते तद्धाम परमं ममा ॥६॥
na tadbhāsayate sūryo na śaśāṅko na pāvakaḥ |
yadvatvā na nivartante taddhāma paramaṃ mamā ||6||

ममैवांशो जीवलोके जवभूतः सनातनः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥७॥
mamaivāṃśo jīvaloke javabhūtaḥ sanātanaḥ |
manaḥṣaṣṭhānīndriyāṇi prakṛtisthāni karṣati ||7||

शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाशयात् ॥८॥
śarīraṃ yadavāpnoti yaccāpyutkrāmatīśvaraḥ |
gṛhītvaitāni saṃyāti vāyurgandhānivāśayāt ||8||

श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ।
अधिष्ठाय मनश्चायं विषयानुपसेवते ॥९॥
śrotraṃ cakṣuḥ sparśanaṃ ca rasanaṃ ghrāṇameva ca |
adhiṣṭhāya manaścāyaṃ viṣayānupasevate ||9||

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ॥१०॥
utkrāmantaṃ sthitaṃ vāpi bhuñjānaṃ vā guṇānvitam |
vimūḍhā nānupaśyanti paśyanti jñānacakṣuṣaḥ ||10||

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ॥११॥
yatanto yoginaścainaṃ paśyantyātmanyavasthitam |
yatanto:'pyakṛtātmāno nainaṃ paśyantyacetasaḥ ||11||

यदादित्यगतं तीजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१२॥
yadādityagataṃ tījo jagadbhāsayate:'khilam |
yaccandramasi yaccāgnau tattejo viddhi māmakam ||12||

गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥१३॥
gāmāviśya ca bhūtāni dhārayāmyahamojasā |
puṣṇāmi cauṣadhīḥ sarvāḥ somo bhūtvā rasātmakaḥ ||13||

अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥१४॥
ahaṃ vaiśvānaro bhūtvā prāṇināṃ dehamāśritaḥ |
prāṇāpānasamāyuktaḥ pacāmyannaṃ caturvidham ||14||

सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैदहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥१५॥
sarvasya cāhaṃ hṛdi sanniviṣṭo mattaḥ smṛtirjñānamapohanaṃ ca |
vedaiśca sarvaidahameva vedyo vedāntakṛdvedavideva cāham ||15||

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१६॥
dvāvimau puruṣau loke kṣaraścākṣara eva ca |
kṣaraḥ sarvāṇi bhūtāni kūṭastho'kṣara ucyate ||16||

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युधाहृतः ।
यो लोकत्रयमाविश्य बिभर्तव्यय ईश्वरः ॥१७॥
uttamaḥ puruṣastvanyaḥ paramātmetyudhāhṛtaḥ |
yo lokatrayamāviśya bibhartavyaya īśvaraḥ ||17||

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥
yasmātkṣaramatīto'hamakṣarādapi cottamaḥ |
ato'smi loke vede ca prathitaḥ puruṣottamaḥ ||18||

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥१९॥
yo māmevamasammūḍho jānāti puruṣottamam |
sa sarvavidbhajati māṃ sarvabhāvena bhārata ||19||

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥२०॥
iti guhyatamaṃ śāstramidamuktaṃ mayānagha |
etadbuddhvā buddhimānsyātkṛtakṛtyaśca bhārata ||20||

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः ॥
om̐ tatsaditi śrīmadbhagavadgītāsūpaniṣatsu brahmavidyāyāṃ yogaśāstre
śrīkṛṣṇārjunasaṃvāde puruṣottamayogo nāma pañcadaśo'dhyāyaḥ ||

सर्वधर्मन् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥१८-६६॥
sarvadharman parityajya māmekaṃ śaraṇaṃ vraja |
ahaṃ tvā sarvapāpebhyo mokṣayiṣyāmi mā śucaḥ ||18-66||

अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे ।
ज्ञानवैराग्यसिद्ध्यार्थं भिक्षां देहि व पार्वति ॥
annapūrṇe sadāpūrṇe śaṅkaraprāṇavallabhe |
jñānavairāgyasiddhyārthaṃ bhikṣāṃ dehi va pārvati ||
ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणाहुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥४-२४॥
brahmārpaṇaṃ brahma haviḥ brahmāgnau brahmaṇāhutam |
brahmaiva tena gantavyaṃ brahmakarmasamādhinā ||4-24||

नमः पार्वतीपतये । हर हर महादेव ॥
namaḥ pārvatīpataye | hara hara mahādeva ||

○クラスの終わりの祈り

स्वस्ति प्रजाभ्यः परिपालयन्ताम् ।
न्याय्येन मार्गेण महीं महिशाः ।
गोब्रह्मणेभ्यः शुभमस्तु नित्यम् ।
लोकाः समस्ताः सुखिनो भवन्तु ॥
svasti prajābhyaḥ paripālayantām |
nyāyyena mārgeṇa mahīṃ mahiśāḥ |
gobrahmaṇebhyaḥ śubhamastu nityam |
lokāḥ samastāḥ sukhino bhavantu ||

काले वर्षतु पर्जन्यः । पृथिवी सस्यशालिनी ।
देशोऽयं क्षोभरहितः ।ब्राह्मणाः सन्तु निर्भयाः ॥
kāle varṣatu parjanyaḥ | pṛthivī sasyaśālinī |
deśo'yaṃ kṣobharahitaḥ |brāhmaṇāḥ santu nirbhayāḥ ||

सर्वे भवन्तु सुखिनः ।सर्वे सन्तु निरामया: ।
सर्वे भद्राणि पश्यन्तु ।मा कश्चिद् दुःखभाग् भवेत् ॥
sarve bhavantu sukhinaḥ |sarve santu nirāmayā: |
sarve bhadrāṇi paśyantu |mā kaśvid duḥkhabhāg bhavet ||

असतो मा सद्गमय ।तमसो मा ज्योतिर्गमय ।
मृत्योर्मा अमृतं गमय ॥
asato mā sadgamaya |tamaso mā jyotirgamaya |
mṛtyormā amṛtaṃ gamaya ||

ओं पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
oṃ pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrṇamudacyate |
pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||

ओं शान्तिः शान्तिः शान्तिः ।
oṃ śāntiḥ śāntiḥ śāntiḥ |

हरिः ओम् ॥
श्रीगुरुभ्यो नमः॥
हरिः ओम् ॥
hariḥ om ||
śrīgurubhyo namaḥ||
hariḥ om ||

○गुरुस्तोत्रम्（キャンプの最後にチャンティング）

अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥१॥
akhaṇḍamaṇḍalākāraṃ vyāptaṃ yena carācaram |
tatpadaṃ darśitaṃ yena tasmai śrīgurave namaḥ ||1||

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥२॥
ajñānatimirāndhasya jñānāñjanaśalākayā |
cakṣurunmīlitaṃ yena tasmai śrīgurave namaḥ ||2||

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥३॥
gururbrahmā gururviṣṇurgururdevo maheśvaraḥ |
gurureva paraṃ brahma tasmai śrīgurave namaḥ ||3||

स्थावरं जङ्गमं व्याप्तं यत्किञ्चित् सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥४॥
sthāvaraṃ jaṅgamaṃ vyāptaṃ yatkiñcit sacarācaram |
tatpadaṃ darśitaṃ yena tasmai śrīgurave namaḥ ||4||

चिन्मयं व्यापि यत्सर्वं त्रैलोक्यं सचराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥५॥
cinmayaṃ vyāpi yatsarvaṃ trailokyaṃ sacarācaram |
tatpadaṃ darśitaṃ yena tasmai śrīgurave namaḥ ||5||

सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजः ।
वेदान्ताम्बुजसूर्यो यस्तस्मै श्रीगुरवे नमः ॥६॥
sarvaśrutiśiroratnavirājitapadāmbujaḥ |
veāntāmbujasūryo yastasmai śrīgurave namaḥ ||6||

चैतन्यः शाश्वतः शान्तो व्योमातीतो निरञ्जनः ।
बिन्दुनादकलातीतस्तस्मै श्रीगुरवे नमः ॥७॥
caitanyaḥ śāśvataḥ śānto vyomātīto nirañjanaḥ |
bindunādakalātītastasmai śrīgurave namaḥ ||7||

ज्ञानशक्तिसमारूढस्तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥८॥
jñānaśaktisamārūḍhastattvamālāvibhūṣitaḥ |
bhuktimuktipradātā ca tasmai śrīgurave namaḥ ||8||

अनेकजन्मसम्प्राप्तकर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥९॥
anekajanmasamprāptakarmabandhavidāhine |
ātmajñānapradānena tasmai śrīgurave namaḥ ||9||

शोषणं भवसिन्धोश्च ज्ञापनं सारसम्पदः ।
गुरोः पादोदकं सम्यक् तस्मै श्रीगुरवे नमः ॥१०॥
śoṣaṇaṃ bhavasindhośca jñāpanaṃ sārasampadaḥ |
guroḥ pādodakaṃ samyak tasmai śrīgurave namaḥ ||10||

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
तत्त्वज्ञानात् परं नास्ति तस्मै श्रीगुरवे नमः ॥११॥
na guroradhikaṃ tattvaṃ na guroradhikaṃ tapaḥ |
tattvajñānāt paraṃ nāsti tasmai śrīgurave namaḥ ||11||

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगद्गुरुः ।
मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥१२॥
mannāthaḥ śrījagannātho madguruḥ śrījagadguruḥ |
madātmā sarvabhūtātmā tasmai śrīgurave namaḥ ||12||

गुरुरादिरनादिश्च गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति तस्मै श्रीगुरवे नमः ॥१३॥
gururādiranādiśca guruḥ paramadaivatam |
guroḥ parataraṃ nāsti tasmai śrīgurave namaḥ ||13||

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिम् ।
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्षम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतम् ।
भावातीतं त्रिकुणरहितं सद्रुं तं नमामि ॥१४॥
brahmānandaṃ paramasukhadaṃ kevalaṃ jñānamūrtim |
dvandvātītaṃ gaganasadṛśaṃ tattvamasyādilakṣam |
ekaṃ nityaṃ vimalamacalaṃ sarvadhīsākṣibhūtam |
bhāvātītaṃ trikuṇarahitaṃ sadruṃ taṃ namāmi ||14||

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥१५॥
tvaeva mātā ca pitā tvameva tvameva bandhuśca sakhā tvameva |
tvameva vidyā draviṇaṃ tvameva tvameva sarvaṃ mama devadeva ||15||